# आदर्श-प्रश्नपत्रम्

**संस्कृतम् ( ऐच्छिक )**

**कक्षा - द्वादश ( XII )**

**समय- होरात्रयम्** **पूर्णाङ्काः-100**

## खण्डः - 'क' ( 40 )

1. **( क ) अधोलिखितस्य गद्यांशस्य सरलार्थं हिन्दी/आङ्ग्ल/संस्कृतभाषायां लिखत।** 5

भवादृश एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि विशन्ति सुखेनोपदेशगुणाः। हरति अतिमलिनमपि दोषजातं गुरूपदेशः। गुरूपदेशश्च नाम अखिलमलप्रक्षालनक्षमम् अजलं स्नानम्। विशेषेण तु राज्ञाम्। विरला हि तेषामुपदेष्टारः। राजवचनमनुगच्छति जनो भयात्। उपदिश्यमानमपि ते न शृण्वन्ति। अवधीरयन्तः खेदयन्ति हितोपदेशदायिनो गुरून्।

**( ख ) अधोलिखितस्य श्लोकस्य सरलार्थं हिन्दी/आङ्ग्ल/संस्कृतभाषायां लिखत।** 5

पापान्निवारयति योजयते हिताय
गुह्यं निगूहति गुणान् प्रकटी करोति।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः।।

2. **( क ) अधोनिर्दिष्टेषु गद्यांशेषु कस्यचित् एकस्य हिन्दी/आङ्ग्ल/संस्कृतभाषायां सप्रसङ्गं व्याख्या कुरुत।** 5

(*i*) मनुष्याणां हिंसावृत्तिस्तु निरवधिः। पशुहत्या तु तेषाम् आक्रीडनम्। केवलं विक्लान्तचित्तविनोदाय महारण्यम् उपगम्य ते यथेच्छं निर्दयं च पशुघातं कुर्वन्ति। तेषां पशुप्रहारव्यापारमालोक्य जडानामपि अस्माकं विदीर्यते हृदयम्।

(*ii*) अहो असारोऽयं संसारः, कदा कस्य किं भविष्यतीति न ज्ञायते। यच्चोपार्जितानां वित्तं तदपि दानभोगैर्विना सफलं न भवति।

(*iii*) तावदकस्मादुत्थितो महान् झञ्झावातः। एकः सायं समयप्रयुक्तः स्वभाववृत्तोऽन्धकारः, स च द्विगुणितो मेघमालाभिः। झञ्झावातोद्धूतैः रेणुभिः शीर्णपत्रैः कुसुमपरागैः शुष्कपत्रैश्च पुनरेष द्वैगुण्यं प्राप्तः।

**( ख ) अधोलिखितेषु पद्यांशेषु कस्यचित् एकस्य सप्रसङ्गं हिन्दी/आङ्ग्ल/संस्कृत-भाषायां व्याख्या कुरुत।** 5

(*i*) विद्यां चाविद्यां च यस्तद्वेदोभयं स ह।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते।।

(*ii*) न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः।।

(*iii*) यतस्त्वया ज्ञानमशेषमाप्तं
लोकेन चैतन्यमिवोष्णरश्मेः।।

3. **(क) अधोलिखितयोः कयोश्चिद् द्वयोः पद्यांशयोः संस्कृत/हिन्दी/आङ्ग्लभाषायां भावार्थं लिखत।** **2½ × 2 = 5**

(*i*) सूर्ये तपत्यावरणाय दृष्टेः
कल्पेत लोकस्य कथं तमिस्रा।

(*ii*) वृणते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः।

(*iii*) निजहृदिविकसन्तः सन्ति सन्तः कियन्तः।

**(ख) अधोलिखितयोः गद्यनाट्यांशयोः संस्कृत/हिन्दी/आङ्ग्लभाषायां भावार्थं लिखत।** **2½ × 2 = 5**

(*i*) सुलभसौख्यमिदानीं बालत्वं भवति।

(*ii*) यथैव सफलतायाः मूर्तिः सम्मुखमागच्छन्ती विलोक्यते तथैव क्रूरोऽयं किन्तुर्मध्ये प्रविश्य सर्वं विनाशयति।

4. **(क) अधोलिखितं गद्यांशं पठित्वा प्रश्नानां पूर्णवाक्येन उत्तराणि लिखत।** **3 × 2 = 6**

पृथिव्याः सप्तभेदाः। ते च भेदाः सप्तपुटान्युच्यन्ते। तानि च पुटानि अतल-वितल-सुतल-तलातल-रसातल-महातलपातालाख्यानि। अस्मन्मतेऽपि सप्तभेदाः। यथास्मद्वेदे श्रूयते परमेश्वरो यथा सप्तगगनानि तद्वत् पृथिव्याः सप्तविभागान् कृतवान्। अथ पृथिव्याः विभागनिरूपणं यत्र लोकास्तिष्ठन्ति। तस्याः दार्शनिकैः सप्तधा विभागः कृतस्तान् विभागान् सप्त अ अक्लिम इति वदन्ति। एतान् खण्डान् पलाण्डुत्वग्वदुपर्यधो भावेन न ज्ञायन्ते, किन्तु निःश्रेणीसोपानवज्जानन्ति।

(*i*) पृथिव्याः कति भेदाः?

(*ii*) अस्मद्वेदे किं श्रूयते?

(*iii*) पृथिव्याः विभागनिरूपणविषये दार्शनिकानां किं मतम्?

4. **(ख) अधोलिखितानां प्रश्नानाम् एकपदेन उत्तराणि लिखत।** **1 × 4 = 4**

(*i*) कौत्सः कस्य शिष्य आसीत्?

(*ii*) केषाम् उपदेष्टारः विरलाः सन्ति?

(*iii*) श्रीनायारस्य पार्श्वे कया पत्रं प्रेषितम्?

(*iv*) वाक्यमध्ये प्रविश्य सर्वं कार्यं केन विनाश्यते?

## खण्डः – 'ख' (20)

5. **अधोलिखितानां प्रश्नानामुत्तराणि हिन्दी/आङ्ग्ल/संस्कृतभाषया देयानि।** **5 × 4 = 20**

**(अ)** (*i*) वेदाः कति सन्ति? तेषां नामानि लिखत। **2**

(*ii*) वेदाङ्गस्य कोऽर्थः? वेदाङ्गानां नामानि च लिखत। **3**

**(आ)** (*i*) रामायणस्य रचयिता कः आसीत्? **1**

(*ii*) महाभारते कति पर्वाणि? तस्य रचनाकारश्च कः? **2**

(*iii*) श्रीमद्भगवद्गीतायां केन कं प्रति उपदेशः प्रदत्तः? **2**

(इ) (*i*) कीदृशी रचना पद्यमिति कथ्यते? 1

(*ii*) रघुवंशमहाकाव्यम् कस्य कवेः रचना अस्ति? 1

(*iii*) बाणभट्टस्य प्रसिद्धतमः गद्यग्रन्थः कः? 1

(*iv*) पदलालित्यं कस्य प्रसिद्धम्? तस्य रचनायाः नाम च लिखत। 2

(ई) (*i*) कालिदासः कति नाटकानि अलिखत्? तेषां नामानि च लिखत। 2

(*ii*) प्रतिमानाटकम् कस्य रचना अस्ति? 1

(*iii*) बृहत्त्रयीकाव्येषु केषां कवीनां रचनाः सम्मिलिताः सन्ति। 2

## खण्डः – 'ग' (20)

6. **(क) अधोलिखितेषु त्रयाणां छन्दसां लक्षणानि सोदाहरणं लिखत।** 3 × 2 = 6

(*i*) उपेन्द्रवज्रा (*ii*) मालिनी

(*iii*) शिखरिणी (*iv*) वसन्ततिलका

**(ख) अधोलिखितश्लोकेषु छन्दसां निर्देशं कुरुत।** 4 × 1 = 4

(*i*) वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते।
संवृत्तिः प्रतिबिम्बतेव निखिला सैवाकृतिः सा द्युतिः।।

(*ii*) यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
सः यत्प्रमाणं कुरुते लोकस्तदनुवर्तते।।

(*iii*) केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वलाः,
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्द्धजाः।

(*iv*) तमध्वरे विश्वजिति क्षितीशं
निःशेषविश्राणित कोषजातम्।
उपात्तविद्यो गुरुदक्षिणार्थी
कौत्सः प्रपेदे वरतन्तुशिष्यः।।

7. **(क) अधोलिखितेषु अलङ्कारेषु केषाञ्चित् त्रयाणां सोदाहरणं लक्षणानि लिखत।** 3 × 2 = 6

(*i*) यमकम् (*ii*) अनुप्रासः

(*iii*) रूपकम् (*iv*) उपमा

**(ख) अधोलिखितेषु पङ्क्तिषु अलङ्काराणां निर्देशं कुरुत।** 4 × 1 = 4

(*i*) रमते न मरालस्य मानसं मानसं विना।

(*ii*) यतस्त्वया ज्ञानमशेषमाप्तं
लोकेन चैतन्यमिवोष्णरश्मेः।

(*iii*) तावत् कोकिल विरसान् यापय दिवसान् वनान्तरे निवसन्।
यावन्मिलदलिमालः कोऽपि रसालः समुल्लसति।।

(*iv*) वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते।
संवृत्तिः प्रतिबिम्बतेव निखिला सैवाकृतिः सा द्युतिः।।

## खण्डः - 'घ' ( 10 )

8. ( क ) 1. **अधोलिखितेषु पेदषु केषाञ्चित् त्रयाणां पदानां विग्रहं कुरुत।** 3 × 1 = 3

( *i* ) उपात्तविद्य: ( *ii* ) उपकरणसम्भार:

( *iii* ) पितरौ ( *iv* ) प्रत्येकम्

2. **अधोलिखितयोः विग्रहवाक्ययोः समस्तपदानि विलिख्य समासनाम च लिखत।** 2 × 1 = 2

( *i* ) अष्टानाम् अध्यायानां समाहार:।

( *ii* ) कर्मसु नैपुण्यम्।

( ख ) 1. **अधोलिखितपदानां प्रयोगं कृत्वा संस्कृतेन वाक्यं रचयत।** 3 × 1 = 3

( *i* ) मह्यम् ( *ii* ) विद्यालये ( *iii* ) संस्कृतम्

2. **अधोलिखितपदे प्रयुज्य वाक्यरचनां कुरुत।** 2 × 1 = 2

सह, नम:

## खण्डः - 'ङ' ( 10 )

9. **अधोलिखितेषु विषयेषु कमप्येकं विषयमवलम्ब्य पञ्चदशवाक्यपरिमितं निबन्धं लिखत।** 10

( *i* ) छात्रजीवनम्

( *ii* ) विद्यालयस्य वार्षिकोत्सव:

( *iii* ) पर्यावरणसंरक्षणम्

( *iv* ) महाकवि: कालिदास:

( *v* ) आदिकाव्यं रामायणम्

# संस्कृत (ऐच्छिक) कक्षा – द्वादश XII

## अंक योजना

| प्रश्न | संभावित उत्तर | | अंक विभाजन |
|---|---|---|---|
| 1. (क) | गद्यांशस्य सरलार्थः (अत्र लेखनम् अनपेक्षितम्) | | 5 |
| 1. (ख) | श्लोकस्य सरलार्थः | | 5 |
| 2. (क) | गद्यांशस्य सप्रसङ्गं व्याख्या | प्रसङ्ग–1, व्याख्या–4 | 5 |
| 2. (ख) | श्लोकस्य सप्रसङ्गं व्याख्या | प्रसङ्ग–1, व्याख्या–4 | 5 |
| 3. (क) | द्वयोः पद्यांशयोः भावार्थः | 2½ + 2½ | 5 |
| 3. (ख) | द्वयोः नाट्यांशयोः भावार्थः | 2½ + 2½ | 5 |
| 4. (क) उत्तराणि | 1. सप्तभेदाः | 3 | 6 |
| | 2. परमेश्वरः सप्तगगनानिवत् पृथिव्याः सप्तविभागान् कृतवान् | 3 | |
| | 3. दार्शनिकाः पृथिव्याः खण्डान् निःश्रेणीसोपानवञ्जानन्ति | 3 | |
| 4. (ख) उत्तराणि | 1. वरतन्तोः | 1 | 4 |
| | 2. राज्ञाम् | 1 | |
| | 3. मेर्या | 1 | |
| | 4. किन्तुना | 1 | |
| 5. (अ) उत्तराणि | | | |
| | (*i*) चत्वारः, ऋग्वेदः, यजुर्वेदः, अथर्ववेदः, सामवेदः | 1 + 1 | 5 |
| | (*ii*) वैदिकसाहित्यसम्बद्धशास्त्राणि वेदाङ्गानि कथ्यन्ते | 1 | |
| | वेदाङ्गानि–शिक्षा, कल्पः, निरुक्तम्, व्याकरणम्, छन्दः ज्योतिषम् च | 2 | |
| (आ) | (*i*) बाल्मीकि | 1 | 5 |
| | (*ii*) अष्टादशपर्वाणि, व्यासः | 1 + 1 = 2 | |
| | (*iii*) श्रीकृष्णेन अर्जुनप्रति | 2 | |
| (इ) | (*i*) छन्दोयुक्ता रचना | 1 | 5 |
| | (*ii*) कालिदासस्य | 1 | |
| | (*iii*) कादम्बरी | 1 | |
| | (*iv*) दण्डिनः, दशकुमारचरितम् | 1 + 1 | |
| (ई) | (*i*)त्रीणि। अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम्, विक्रमोर्वशीयम् | 1 + 1 | 5 |
| | (*ii*)भासस्य | 1 | |
| | (*iii*) त्रयाणां कवीनाम्–भारवेः, माघस्य श्रीहर्षस्य च | 2 | |

| | | | |
|---|---|---|---|
| 6. (क) छन्दसां लक्षणानि उदाहरणानि च लेखनीयानि। | | लक्षणाय–1<br>उदाहरणाय–1 | 3 × 2 = 6 |
| (ख) छन्दसां निर्देश: | | | |
| (*i*) शार्दूलविक्रीडितम् | (*ii*) अनुष्टुप् | | |
| (*iii*) शार्दूलविक्रीडितम् | (*iv*) उपजाति: | | 4 × 1 = 4 |
| 7. (क) त्रयाणाम् अलङ्काराणां सोदाहरणं लक्षणानि। | | लक्षणाय–1<br>उदाहरणाय–1 | 3 × 2 = 6 |
| (ख) अलङ्काराणां निर्देश:– | | | |
| (*i*) यमकम् | (*ii*) उपमा | | 4 × 1 = 4 |
| (*iii*) अन्योक्ति: | (*iv*) उत्प्रेक्षा | | |
| 8. (क) 1. उत्तराणि–त्रयाणां पदानां विग्रहा: अपेक्षिता: | | | 3 × 1 = 3 |
| (*i*) उपात्ता विद्या येन स: | (*ii*) उपकरणानां सम्भार: | | |
| (*iii*) माता च पिता च | (*iv*) एकं एकं प्रति | | |
| 2. उत्तराणि | | | |
| (*i*) अष्टाध्यायी | (*ii*) द्विगुसमास: | ½ + ½ | = 1 |
| (*iii*) कर्मनैपुण्यम् | (*iv*) सप्तमी तत्पुरुष: | ½ + ½ | = 1 |
| 8. (ख) 1. निर्दिष्टपदानां प्रयोगं कृत्वा वाक्यरचना | | | 1 + 1 + 1 = 3 |
| 2. उपपदविभक्ति प्रयोग:–'सह' इति योगे | | | 1 |
| (वाक्यरचना) | 'नम:' इति योगे | | 1 |

9. निबन्धस्य कृते अधोलिखितरीत्या अङ्का: प्रदेया:

| | | |
|---|---|---|
| विषयवस्तु | 4 | |
| भाषाशुद्धि: | 3 | 10 |
| भाषाशैली | 3 | |

**कुल योग** **100**

# संस्कृत (ऐच्छिक) कक्षा - द्वादश XII

## अंक विभाजन

| | | | |
|---|---|---|---|
| 1. | **पाठ्यपुस्तक** | | 40 अंक |
| | (क) (*i*) गद्यांश का सरलार्थ (हिन्दी/अंग्रेजी/संस्कृत भाषा में) | 5 | |
| | (*ii*) पद्यांश का सरलार्थ (हिन्दी/अंग्रेजी/संस्कृत भाषा में) | 5 | |
| | (ख) (*i*) गद्यांश की सप्रसंग व्याख्या (हिन्दी/अंग्रेजी/संस्कृत भाषा में) | 5 | |
| | (*ii*) पद्यांश की सप्रसंग व्याख्या (हिन्दी/अंग्रेजी/संस्कृत भाषा में) | 5 | |
| | (ग) (*i*) पद्यांश की पंक्ति का भावार्थ (हिन्दी/अंग्रेजी/संस्कृत भाषा में) | 5 | |
| | (*ii*) गद्यांश/नाट्यांश की पंक्ति का भावार्थ (हिन्दी/अंग्रेजी/संस्कृत भाषा में) | 5 | |
| | (घ) संस्कृत में प्रश्नोत्तर | 10 | |
| | (*i*) लघु-उत्तरीय | (3 × 2 = 6) | |
| | (*ii*) अति लघु-उत्तरीय | (1 × 4 = 4) | |
| 2. | **संस्कृत साहित्य का इतिहास** | | 20 अंक |
| | (परिचयात्मक ज्ञान के प्रश्न) | | |
| | (*i*) वैदिक साहित्य (वेद उपनिषद्) | 5 | |
| | (*ii*) रामायण, महाभारत (गीता सहित) | 5 | |
| | (*iii*) काव्य (गद्य-पद्य) | 5 | |
| | (*iv*) नाटक | 5 | |
| 3. | **छन्द** | | 10 अंक |
| | (*i*) निर्धारित छन्दों की परिभाषा (लक्षण एवं उदाहरण सहित) | (3 × 2 = 6) | |

(*ii*) पाठ्यपुस्तक में प्रयुक्त श्लोकों के छन्द को पहचान कर लिखना। (4 × 1 = 4)

4. **अलंकार** 10 अंक

(*i*) निर्धारित अलंकार की परिभाषा (लक्षण एवं उदाहरण सहित) (3 × 2 = 6)

(*ii*) पाठ्यपुस्तक में प्रयुक्त श्लोकों के अलंकार को पहचान कर लिखना। (4 × 1 = 4)

5. **व्याकरण** 10 अंक

(क) समास

(*i*) समस्तपदों का विग्रह एवं नाम 3

(*ii*) विग्रहित पदों का समस्तपद एवं नाम 2

(ख) (*i*) कारक विभक्ति का संस्कृत वाक्य में प्रयोग 3

(*ii*) उपपद-विभक्ति का संस्कृत वाक्य में प्रयोग 2

6. **लघु निबन्ध** 10 अंक

(संस्कृत में 15 वाक्य)

छात्रों के परिचित विषय पर

कुल अंक - 100 अंक